# Devaih Kritam Mahavishnu Stotram

# દેવૈઃ કૃતં મહાવિષ્ણુસ્તોત્રમ્

## Document Information

Text title : mahAviShNustotram devaiH kRitaM

File name : devaiHkRRitaMmahAviShNustotram.itx

Category : vishhnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide

Proofread by : Vishwas Bhide, PSA Easwaran

Acknowledge-Permission: http://satsangdhara.net

Latest update : April 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 1, 2021

*sanskritdocuments.org*

# દેવૈઃ કૃતં મહાવિષ્ણુસ્તોત્રમ્

(દેવીભાગવતતઃ)

સૂત ઉવાચ -
તે ગત્વા દેવદેવેશં રમાનાથં જગદ્ગુરુમ્ ।
વિષ્ણું કમલપત્રાક્ષં દદૃશુઃ પ્રભયાન્વિતમ્ ॥ ૧॥

સ્તોત્રેણ તુષ્ટુવુર્ભક્ત્યા ગદ્ગદસ્વરસત્કૃતાઃ ।
દેવા ઊચુઃ -
જય વિષ્ણો રમેશાદ્ય મહાપુરુષ પૂર્વજ ॥ ૨॥

દૈત્યારે કામજનક સર્વકામફલપ્રદ ।
મહાવરાહ ગોવિન્દ મહાયજ્ઞસ્વરૂપક ॥ ૩॥

મહાવિષ્ણો ધ્રુવેશાદ્ય જગદુત્પત્તિકારણ ।
મત્સ્યાવતારે વેદાનામુદ્ધારાધારરૂપક ॥ ૪॥

સત્યવ્રત ધરાધીશ મત્સ્યરૂપાય તે નમઃ ।
જયાકૂપાર દૈત્યારે સુરકાર્યસમર્પક ॥ ૫॥

અમૃતાપ્તિકરેશાન કૂર્મરૂપાય તે નમઃ ।
જયાદિદૈત્યનાશાર્થમાદિસૂકરરૂપધૃક્ ॥ ૬॥

મહ્યુદ્ધારકૃતોદ્યોગકોલરૂપાય તે નમઃ ।
નારસિંહં વપુઃ કૃત્વા મહાદૈત્યં દદાર યઃ ॥ ૭॥

કરજૈર્વરદૃપ્તાઙ્ગં તસ્મૈ નૃહરયે નમઃ ।
વામનં રૂપમાસ્થાય ત્રૈલોક્યૈશ્વર્યમોહિતમ્ ॥ ૮॥

બલિં સઞ્છલયામાસ તસ્મૈ વામનરૂપિણે ।
દુષ્ટક્ષત્રવિનાશાય સહસ્રકરશત્રવે ॥ ૯॥

રેણુકાગર્ભજાતાય જામદગ્ન્યાય તે નમઃ ।

દુષ્ટરાક્ષસપૌલસ્ત્યશિરશ્છેદપટીયસે ॥ ૧૦॥

શ્રીમદ્દાશરથે તુભ્યં નમોઽનન્તક્રમાય ચ ।
કંસદુર્યોધનાદ્યૈશ્ચ દૈત્યૈઃ પૃથ્વીશલાઞ્છનૈઃ ॥ ૧૧॥

ભારાક્રાન્તાં મહીં યોઽસાવુજ્જહાર મહાવિભુઃ ।
ધર્મં સંસ્થાપયામાસ પાપં કૃત્વા સુદૂરતઃ ॥ ૧૨॥

તસ્મૈ કૃષ્ણાય દેવાય નમોઽસ્તુ બહુધા વિભો ।
દુષ્ટયજ્ઞવિઘાતાય પશુહિંસાનિવૃત્તયે ॥ ૧૩॥

બૌદ્ધરૂપં દધૌ યોઽસૌ તસ્મૈ દેવાય તે નમઃ ।
મ્લેચ્છપ્રાયેઽખિલે લોકે દુષ્ટરાજન્યપીડિતે ॥ ૧૪॥

કલ્કિરૂપં સમાદધ્યૌ દેવદેવાય તે નમઃ ।
દશાવતારાસ્તે દેવ ભક્તાનાં રક્ષણાય વૈ ॥ ૧૫॥

દુષ્ટદૈત્યવિઘાતાય તસ્માત્ત્વં સર્વદુઃખહૃત્ ।
જય ભક્તાર્તિનાશાય ધૃતં નારીજલાત્મસુ ॥ ૧૬॥

રૂપં યેન ત્વયા દેવ કોઽન્યસ્ત્વત્તો દયાનિધિઃ ।
ઇત્યેવં દેવદેવેશં સ્તુત્વા શ્રીપીતવાસસમ્ ॥ ૧૭॥

પ્રણેમુર્ભક્તિસહિતાઃ સાષ્ટાઙ્ગં વિબુધર્ષભાઃ ।
તેષાં સ્તવં સમાકર્ણ્ય દેવઃ શ્રીપુરુષોત્તમઃ ॥ ૧૮॥

ઉવાચ વિબુધાન્સર્વાન્ હર્ષયચ્છ્રીગદાધરઃ ।
શ્રીભગવાનુવાચ -
પ્રસન્નોઽસ્મિ સ્તવેનાહં દેવાસ્તાપં વિમુઞ્ચથ ॥ ૧૯॥

ભવતાં નાશયિષ્યામિ દુઃખં પરમદુઃસહમ્ ।
વૃણુધ્વં ચ વરં મત્તો દેવાઃ પરમદુર્લભમ્ ॥ ૨૦॥

દદામિ પરમપ્રીતઃ સ્તવસ્યાસ્ય પ્રસાદતઃ ।
ય એતત્પઠતે સ્તોત્રં કલ્ય ઉત્થાય માનવઃ ॥ ૨૧॥

મયિ ભક્તિં પરાં કૃત્વા ન તં શોકઃ સ્પૃશેત્કદા ।
અલક્ષ્મીઃ કાલકર્ણી ચ નાક્રામેત્તદ્ગૃહં સુરાઃ ॥ ૨૨॥

નોપસર્ગા ન વેતાલા ન ગ્રહા બ્રહ્મરાક્ષસાઃ ।
ન રોગા વાતિકાઃ પૈત્તાઃ શ્લેષ્મસમ્ભવિનસ્તથા ॥ ૨૩॥

નાકાલમરણં તસ્ય કદાપિ ચ ભવિષ્યતિ ।
સન્તતિશ્ચિરકાલસ્થા ભોગાઃ સર્વે સુખાદયઃ ॥ ૨૪॥

સમ્ભવિષ્યન્તિ તન્મર્ત્યગૃહે યઃ સ્તોત્રપાઠકઃ ।
કિં પુનર્બહુનોક્તેન સ્તોત્રં સર્વાર્થસાધકમ્ ॥ ૨૫॥

એતસ્ય પઠનાન્નૃણાં ભુક્તિમુક્તી ન દૂરતઃ ।
દેવા ભવત્સુયદ્દુઃખં કથ્યતાં તદસંશયમ્ ॥ ૨૬॥

નાશયામિ ન સન્દેહશ્ચાત્ર કાર્યોઽણુરેવ ચ ।
એવં શ્રીભગવદ્વાક્યં શ્રુત્વા સર્વે દિવૌકસઃ ।
પ્રસન્નમનસઃ સર્વે પુનરૂચુર્વૃષાકપિમ્ ॥ ૨૭॥

ઇતિ દેવીભાગવતે દશમસ્કન્ધે પઞ્ચમાધ્યાયાન્તર્ગતં
દેવૈઃકૃતં મહાવિષ્ણુસ્તોત્રં સમાપ્તમ્ ॥

Encoded by Vishwas Bhide

Proofread by Vishwas Bhide, PSA Easwaran

*Devaih Kritam Mahavishnu Stotram*

pdf was typeset on May 1, 2021

Please send corrections to *sanskrit@cheerful.com*